# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा – आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् — २ | |
| विषयः – स्वामिनारायणवेदान्तः ( J ) | (C.C.- 5.3.7 New ) | गुणाः – ७० |
| दिनाङ्कः – १०/१०/२०१९ | सन्दर्भग्रन्थः ब्रह्मसूत्रभाष्यरत्नम्–३ | समयः –३.०० तः ६.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितयोरेक एव समाधेयः ।** **(५)**

(१) ''तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्'' – इतीदं सूत्रं यथाग्रन्थं व्याख्यात ।

(२) ''कृतात्येऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च'' – इतीदं सूत्रं ग्रन्थोक्तदिशा व्याख्यात ।

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **(१०)**

(१) भाष्योक्तदिशा तदन्तरप्रतिपत्त्यधिकरणं व्याख्यात ।

(२) भाष्यानुगुणम् अनिष्टादिकार्यधिकरणमुपवर्णयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितयोरेक एव समाधेयः ।** **(५)**

(१) ''तदभावो नाडीषु तच्छ्रुतेरात्मनि च'' इतीदं सूत्रं यथाग्रन्थं प्रतिपादयत ।

(२) ''परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः'' इतीदं सूत्रं ग्रन्थानुगुणं विवृणुत ।

**प्रश्नः ४ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **(१०)**

(१) भाष्योक्तदिशा उभयलिङ्गाधिकरणं प्रतिपादयत ।

(२) ग्रन्थानुगुणं प्रकृतैतावत्वाधिकरणं प्रतिपादयत ।

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितयोरेक एव समाधेयः ।** **(५)**

(१) ''सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्'' इतीदं सूत्रं ग्रन्थानुगुणं व्याख्यात ।

(२) भाष्यानुसारम् अङ्गावबद्धाधिकरणं विवेचयत ।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **(१०)**

(१) ग्रन्थोक्तदिशा सर्ववेदान्तप्रत्ययाधिकरणं निरूपयत ।

(२) भाष्यानुसारं यथाश्रयभावाधिकरणं विवृणुत ।

## चतुर्थान्विति:

**प्रश्नः ७ निम्नलिखितयोरेक एव समाधेयः ।** **(५)**

(१) ''विधिर्वा धारणवत्'' इतीदं सूत्रं भाष्यानुसारं व्याख्यात ।

(२) ग्रन्थोक्तदिशा कृत्स्नभावाधिकरणमुपपादयत ।

**प्रश्नः ८ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **(१०)**

(१) भाष्योक्तदिशा पुरुषार्थाधिकरणम् उपवर्णयत ।

(२) ग्रन्थोक्तदिशा सर्वान्नानुमत्यधिकरणं विशदयत ।

**प्रश्नः ९ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः ।** **(१०)**

(१) तृतीयाध्यायस्य चतुर्थे पादे किं निरूप्यते ?

(२) श्रद्धाशब्दः अप्सु कथं युज्यते ?

(३) चरणशब्देन किमुच्यते ?

(४) ब्रह्मसूत्रभाष्यरत्नस्य तृतीयाध्याये कति अधिकरणानि वर्तन्ते ?

(५) उभयलिङ्गं नाम किम् ?

(६) परब्रह्मस्वरूपं केन गृह्यते ?

(७) किं नाम अमूर्तत्वम् ?

(८) कस्य ज्ञानेनैव मोक्षो भवति ?

(९) सर्वकर्मफलप्रदाता कः ?

(१०) तृतीयाध्यायस्य तृतीयपादे किं प्रतिपाद्यते ?

(११) मुमुक्षुध्येयत्वं कस्य उक्तम् ?

(१२) भगवत्सेवारूपा मुक्तिः कस्य ध्यानेनैव प्राप्यते ?

(१३) उपकोसलाद्युपासनेषु का गतिः आम्नायते ?

(१४) भागवतीतनुसम्बन्धः केषां भवति ?

(१५) तृतीयाध्यायस्य चतुर्थपादे कति अधिकरणानि सन्ति ?

--००--